श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे

# ॥ तृतीयाष्टके अष्टमः प्रश्नः ॥

## (अश्वमेधम् - १)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ तृतीयाष्टके अष्टमः प्रश्नः ॥

## (अश्वमेधम् - १)

हरिः ओ(४)म्।
साङ्ग्रहण्येष्ट्या यजते।
इमां जनताग्ं सङ्गृह्णानीति।
द्वादशारत्नी रशना भवति।
द्वादश मासाः संवथ्सरः।
संवथ्सरमेवावरुन्धे।
मौञ्जी भवति।
ऊर्ग्वै मुञ्जाः।
ऊर्जमेवावरुन्धे।
चित्रा नक्षत्रं भवति।
चित्रं वा एतत्कर्म॥ 1॥

यदश्वमेधः समृद्ध्यै।
पुण्यनाम देवयजनमध्यवस्यति।
पुण्यामेव तेन कीर्तिमभिजयति।
अपदातीनृत्विजः समावहन्त्या सुब्रह्मण्यायाः।

sunder kidambi
prapatti dot com
sunder kidambi
Please let us know of any errors in this text.

सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
के॒श॒श्म॒श्रु व॑पते।
न॒खानि॒ निकृ॑न्तते।
द॒तो धा॑वते।
स्नाति॑।
अह॑त॒ं वास॒ः परि॑धत्ते।
पा॒प्मनोऽप॑हत्यै।
वाच॑ं य॒त्वोप॑वसति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ गुप्त्यै॑।
रात्रि॑ं जाग॒रय॑न्त आसते।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै॥ **2**॥

कर्म॑ धत्ते॒ पञ्च॑ च॥ **1**॥

चतु॑ष्टय्य॒ आपो॑ भवन्ति।
चतु॑श्शफो॒ वा अश्व॑ः प्राजाप॒त्यः सम॑ृद्ध्यै।
ता दि॒ग्भ्यः स॒माभृ॑ता भवन्ति।
दि॒क्षु वा आप॑ः।
अन्न॒ं वा आप॑ः।
अ॒द्भ्यो वा अन्न॑ं जायते।
यदे॒वाद्भ्योऽन्न॒ं जाय॑ते।
तदव॑रुन्धे।



sunder kidāmbi
prapatti dot com
sunder kidāmbi

तासु॑ ब्रह्मौद॒नं प॑चति।
रेत॑ ए॒व तद्द॑धाति॥ **3**॥

चतु॑श्शरावो भवति।
दि॒क्ष्वे॑व प्रति॑तिष्ठति।
उ॒भ॒यतो॑ रु॒क्मौ भ॑वतः।
उ॒भ॒यत॑ ए॒वास्मि॒न्रुचं॑ दधाति।
उद्धं॑रति शृत॒त्वाय॑।
स॒र्पिष्वा᳚न्भवति मेध्य॒त्वाय॑।
च॒त्वार॑ आर्॒षे॒याः प्राश्नं॑न्ति।
दि॒शामे॒व ज्योतीं॑षि जुहोति।
च॒त्वारि॒ हिर॑ण्यानि ददाति।
दि॒शामे॒व ज्योती॒ग्॒ष्यव॑रुन्धे॥ **4**॥

यदाज्य॑मु॒च्छिष्यं॑ते।
तस्मिं॑न्र॒श॒नां न्यु॑नक्ति।
प्र॒जाप॑ति॒र्वा ओ॑द॒नः।
रेत॒ आज्यं᳚म्।
यदाज्ये॑ र॒श॒नां न्यु॒नक्ति॑।
प्र॒जाप॑तिमे॒व रेत॑सा॒ सम॑र्धयति।
द॒र्भ॒मयी॑ र॒श॒ना भ॑वति।
ब॒हु वा ए॒ष कुं॑च॒रो॑ऽमे॒ध्यमुप॑गच्छति।

यदश्वः।
पवित्रं वै दर्भाः॥ **5**॥

यद्दर्भमयी रशना भवति।
पुनात्येवैनम्।
पूतमेनं मेध्यमालभते।
अश्वस्य वा आलब्धस्य महिमोदक्रामत्।
स महर्त्विजः प्राविशत्।
तन्महर्त्विजां महर्त्विक्त्वम्।
यन्महर्त्विजः प्राश्नन्ति।
महिमानमेवास्मिन्तद्दधाति।
अश्वस्य वा आलब्धस्य रेत उदक्रामत्।
तथ्सुवर्णगं हिरण्यमभवत्।
यथ्सुवर्णगं हिरण्यं ददाति।
रेत एव तद्दधाति।
ओदने ददाति।
रेतो वा ओदनः।
रेतो हिरण्यम्।
रेतसैवास्मिन्रेतो दधाति॥ **6**॥

दधाति रुन्धे दर्भा अभवथ्षट्च॥ **2**॥

sunder kidāmbi prapatti dot com sunder kidāmbi

यो वै ब्रह्मणे देवेभ्यः प्रजापतयेऽप्रतिप्रोच्याश्वं मेध्यं बध्नाति।
आ देवताभ्यो वृश्च्यते।
पापीयान्भवति।
यः प्रतिप्रोच्य।
न देवताभ्य आवृश्च्यते।
वसीयान्भवति।
यदाह।
ब्रह्मन्नश्वं मेध्यं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासमिति।
ब्रह्म वै ब्रह्मा।
ब्रह्मण एव देवेभ्यः प्रजापतये प्रतिप्रोच्याश्वं मेध्यं बध्नाति॥ **7**॥

न देवताभ्य आवृश्च्यते।
वसीयान्भवति।
देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते प्रसूत्यै।
अश्विनोर्बाहुभ्यामित्याह।
अश्विनौ हि देवानामध्वर्यू आस्ताम्।
पूष्णो हस्ताभ्यामित्याह यत्यै।
व्यृद्धं वा एतद्यज्ञस्य।
यदयजुष्केण क्रियते।
इमामगृभ्णन्रशनामृतस्येत्यधिवदति यजुष्कृत्यै।
यज्ञस्य समृद्ध्यै॥ **8**॥

तदाहुः।
द्वादशारत्नी रशना कर्तव्या(३) त्रयोदशारत्नी(३)रिति।
ऋषभो वा एष ऋतूनाम्।
यथ्संवथ्सरः।
तस्य त्रयोदशो मासो विष्टपम्।
ऋषभ एष यज्ञानाम्।
यदश्वमेधः।
यथा वा ऋषभस्य विष्टपम्।
एवमेतस्य विष्टपम्।
त्रयोदशमरत्निग्ं रशनायामुपादधाति॥ 9॥

यथर्षभस्य विष्टपग्ं सग्ग्स्करोति।
तादृगेव तत्।
पूर्व आयुषि विदथेषु कव्येत्याह।
आयुरेवास्मिन्दधाति।
तया देवाः सुतमाबभूवुरित्याह।
भूतिमेवोपावर्तते।
ऋतस्य सामन्थ्सरमारपन्तीत्याह।
सत्यं वा ऋतम्।
सत्येनैवैनमृतेनारभते।
अभिधा असीत्याह॥ 10॥



sunder kidambi prapatti dot com sunder kidāmbi

तस्मा॑दश्वमेधया॒जी सर्वा॑णि भू॒तान्य॒भिभ॑वति।
भुव॑नम॒सीत्या॑ह।
भू॒मान॑मे॒वोपै॑ति।
य॒न्ताऽसीत्या॑ह।
य॒न्तार॑मे॒वैनं᳚ करोति।
ध॒र्ताऽसीत्या॑ह।
ध॒र्तार॑मे॒वैनं᳚ करोति।
सो᳚ऽग्निं वै᳚श्वान॒रमित्या॑ह।
अ॒ग्नावे॒वैनं᳚ वैश्वान॒रे जु॑होति।
सप्र॑थस॒मित्या॑ह॥ **11** ॥

प्र॒जयै॒वैनं᳚ प॒शुभिः॑ प्रथयति।
स्वाहा॑कृत॒ इत्या॑ह।
होम॑ ए॒वास्यै॒षः।
पृ॒थि॒व्यामित्या॑ह।
अ॒स्यामे॒वैनं॒ प्रति॑ष्ठापयति।
य॒न्ता राड्य॒न्ताऽसि॒ यम॑नो ध॒र्ताऽसि॑ ध॒रुण॒ इत्या॑ह।
रू॒पमे॒वास्यै॒तन्म॑हि॒मानं॒ व्याच॑ष्टे।
कृ॒ष्यै त्वा॒ क्षेमा॑य त्वा र॒य्यै त्वा॒ पोषा॑य॒ त्वेत्या॑ह।
आ॒शिष॑मे॒वैतामाशा᳚स्ते।
स्व॒गा त्वा॑ दे॒वेभ्य॒ इत्या॑ह।

दे॒वेभ्य॑ ए॒वैन॑ग्ग् स्व॒गा क॑रोति।
स्वाहा᳚ त्वा प्र॒जाप॑तय॒ इत्या॑ह।
प्रा॒जा॒प॒त्यो वा अश्व॑ः।
यस्या॑ ए॒व दे॒वता॑या आल॒भ्यते᳚।
तयै॒वैन॒ग्॒ं सम॑र्धयति॥ **12** ॥

ब॒ध्ना॒ति॒ सम॑ृद्ध्या उ॒पाद॑धात्य॒सीत्या॑ह॒
सप्र॑थस॒मित्या॑ह दे॒वेभ्य॒ इत्या॑ह॒ पञ्च॑ च॥ **3** ॥

यः पि॒तुर॑नु॒जाया᳚ः पु॒त्रः।
स पु॒रस्ता᳚न्नयति।
यो मा॒तुर॑नु॒जाया᳚ः पु॒त्रः।
स प॒श्चान्न॑यति।
विष्व॑ञ्चमे॒वास्मा᳚त्पा॒प्मानं॒ विवृ॑हतः।
यो अर्व॑न्तं॒ जिघा॑ग्ंसति॒ तम॒भ्य॑मीति॒ वरु॑ण॒ इति॒ श्वान॑ं
चतुर॒क्षं प्रसौ॑ति।
प॒रो मर्त॑ः प॒रः श्वेति॒ शुन॑श्चतुर॒क्षस्य॒ प्रह॑न्ति।
श्वैव॒ वै पा॒प्मा भ्रातृ॑व्यः।
पा॒प्मान॑मे॒वास्य॒ भ्रातृ॑व्यग्ं हन्ति।
सै॒ध्र॒कं मु॒स॑लं भवति॥ **13** ॥

कर्म॑ कर्मै॒वास्मै॑ साधयति।
पौ॒ग्॒श्च॒ले॒यो ह॑न्ति।

पुग्ग्श्चल्वां वै देवाः शुचं न्यंदधुः।
शुचैवास्य शुचगं हन्ति।
पाप्मा वा एतमीँफ्सतीत्यांहुः।
योँऽश्वमेधेन यजंत इतिं।
अश्वंस्याधस्पदमुपाँस्यति।
वज्री वा अश्वंः प्राजापत्यः।
वज्रेंणैव पाप्मानं भ्रातृंव्यमवंक्रामति।
दक्षिणाऽपंप्लावयति॥ **14**॥

पाप्मानंमेवास्माच्छमंलमपं प्लावयति।
ऐषीक उंदूहो भंवति।
आयुर्वा इषीकाँः।
आयुंरेवास्मिंन्दधति।
अमृतं वा इषीकाँः।
अमृतंमेवास्मिंन्दधति।
वेतसशाखोपसम्बंद्धा भवति।
अफ्सुयोंनिर्वा अश्वंः।
अफ्सुजो वेंतसः।
स्वादेवैनं योनेर्निर्मिमीते।
पुरस्ताँत्प्रत्यञ्चंमभ्युदूंहति।
पुरस्तांदेवास्मिंन्प्रतीच्यमृतं दधाति।



sunder kidāmbi prapatti dot com sunder kidāmbi

अ॒हं च॒ त्वं च॑ वृत्रह॒न्निति॑ ब्र॒ह्मा यज॑मानस्य॒ हस्तं॑ गृह्णाति।
ब्र॒ह्म॒क्ष॒त्रे ए॒व सन्द॑धाति।
अ॒भि क्रत्वे॑न्द्र भू॒रध॒ज्मन्नित्य॑ध्व॒र्युर्यज॑मानं वाचयत्य॒भिजि॑त्यै॥ 15॥

भ॒व॒ति॒ प्ला॒व॒य॒ति॒ मि॒मी॒ते॒ पञ्च॑ च॥ 4॥

च॒त्वार॑ ऋ॒त्विज॒ः सम॑ुक्षन्ति।
आ॒भ्य ए॒वैनं॑ चत॒सृभ्यो॑ दि॒ग्भ्यो॑ऽभि समी॑रयन्ति।
श॒तेनं॑ राजपु॒त्रैः स॒हाध्व॒र्युः।
पु॒रस्ता॑त्प्र॒त्यङ्ति॑ष्ठ॒न्प्रोक्ष॑ति।
अ॒नेनाश्वे॑न॒ मेध्ये॑ने॒ष्ट्वा।
अ॒यग्ं राजा॑ वृ॒त्रं व॑ध्या॒दिति॑।
रा॒ज्यं वा अ॑ध्व॒र्युः।
क्ष॒त्रग्ं रा॑जपु॒त्रः।
रा॒ज्येनै॒वास्मि॑न्क्ष॒त्रं द॑धाति।
श॒तेना॑ रा॒जभि॑रु॒ग्रैः स॒ह ब्र॒ह्मा॥ 16॥

द॒क्षि॒ण॒त उ॒द॒ङ्ति॑ष्ठ॒न्प्रोक्ष॑ति।
अ॒नेनाश्वे॑न॒ मेध्ये॑ने॒ष्ट्वा।
अ॒यग्ं राजा॑ऽप्रतिधृ॒ष्यो॑ऽस्त्विति॑।
बलं॒ वै ब्र॒ह्मा।
बल॑मरा॒जोग्रः।
बले॑नै॒वास्मि॒न्बलं॑ दधाति।

श॒तेन॑ सूतग्राम॒णिभि॑ः स॒ह होता᳚।
प॒श्चात्प्राङ्क्तिष्ठ॒न्प्रोक्ष॑ति।
अ॒नेनाश्वे॑न॒ मेध्ये॑ने॒ष्ट्वा।
अ॒यग्ं राजा॒ऽस्यै वि॒शः॥ **17**॥

ब॒हु॒ग्वै ब॑ह्व॒श्वायै॑ बह्वजावि॒कायै᳚।
ब॒हु॒व्री॒हि॒य॒वायै॑ बहुमाषति॒लायै᳚।
ब॒हु॒हि॒र॒ण्यायै॑ बहुह॒स्तिका॑यै।
ब॒हु॒दा॒स॒पू॒रु॒षायै॑ रयि॒मत्यै॒ पुष्टि॑मत्यै।
ब॒हु॒रा॒य॒स्पो॒षायै॒ राजा॒ऽस्त्विति॑।
भू॒मा वै होता᳚।
भू॒मा सू॑तग्राम॒ण्य॑ः।
भू॒म्नैवास्मि॑न्भू॒माने॑ दधाति।
श॒तेन॑ क्षत्तसङ्ग्रही॒तृभि॑ः स॒होद्गा॒ता।
उ॒त्त॒र॒तो द॑क्षि॒णा ति॒ष्ठन्प्रोक्ष॑ति॥ **18**॥

अ॒नेनाश्वे॑न॒ मेध्ये॑ने॒ष्ट्वा।
अ॒यग्ं राजा॒ स॒र्व॒मायु॑रे॒त्विति॑।
आयु॒र्वा उ॑द्गा॒ता।
आयु॑ः क्षत्तसङ्ग्रही॒तार॑ः।
आयु॑षै॒वास्मि॒न्नायु॑र्दधाति।
श॒तग्ं श॑तं भवन्ति।

sunder kidambi prapatti dot com sunder kidambi

श॒तायु॒ः पुरु॑षः श॒तेन्द्रि॑यः।
आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑तिष्ठति।
च॒तु॒श्श॒ता भ॑वन्ति।
चत॑स्रो॒ दिश॑ः।
दि॒क्ष्वे॑व प्रति॑तिष्ठति॥ **19**॥

ब्र॒ह्मा वि॒श उ॑क्षति॒ दिश॒ एक॑ च॥ **5**॥

यथा॒ वै ह॒विषो॑ गृही॒तस्य॒ स्कन्द॑ति।
ए॒वं वा ए॒तदश्व॑स्य स्कन्दति।
यन्नि॒क्तमना॑लब्धमुथ्सृ॒जन्ति॑।
यथ्स्तोक्या॑ अ॒न्वाह॑।
स॒र्व॒हु॒त॑मे॒वैन॑ं करो॒त्यस्क॑न्दाय।
अस्क॑न्न॒ग्ं॒ हि तत्।
यद्धु॒तस्य॒ स्कन्द॑ति।
स॒ह॒स्र॒मन्वा॑ह।
स॒ह॒स्र॑सम्मितः सुव॒र्गो लो॒कः।
सु॒व॒र्गस्य॑ लो॒कस्या॒भिजि॑त्यै॥ **20**॥

यत्परि॑मिता अनु॒ब्रूयात्।
परि॑मित॒मव॑रुन्धीत।
अप॑रिमिता॒ अन्वा॑ह।
अप॑रिमितः सुव॒र्गो लो॒कः।

prapatti dot com sunder kidāmbi

सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
स्तोक्या॑ जुहोति।
या ए॒व वर्ष्या॒ आप॑ः।
ता अव॑रुन्धे।
अ॒स्यां जु॑होति।
इ॒यं वा अ॒ग्निर्वै᳚श्वान॒रः॥ **21**॥

अ॒स्यामे॒वैना॒ः प्रति॑ष्ठापयति।
उ॒वाच॑ ह प्र॒जाप॑तिः।
स्तोक्या॑सु॒ वा अ॒हम॑श्वमे॒धग्ं सग्ग्स्था॑पयामि।
तेन॒ तत॒ः सग्ग्स्थि॑तेन चरा॒मीति॑।
अ॒ग्नये॒ स्वाहेत्या॑ह।
अ॒ग्नय॑ ए॒वैनं॑ जुहोति।
सोमा॑य॒ स्वाहेत्या॑ह।
सोमा॑यै॒वैनं॑ जुहोति।
स॒वि॒त्रे स्वाहेत्या॑ह।
स॒वि॒त्र ए॒वैनं॑ जुहोति॥ **22**॥

सर॑स्वत्यै॒ स्वाहेत्या॑ह।
सर॑स्वत्या ए॒वैनं॑ जुहोति।
पू॒ष्णे स्वाहेत्या॑ह।
पू॒ष्ण ए॒वैनं॑ जुहोति।

sunder kidāmbi
prapatti dot com
sunder kidāmbi

बृ॒हस्पत॑ये॒ स्वाहेत्या॑ह।
बृ॒हस्पत॑य ए॒वैनं॑ जुहोति।
अ॒पां मोदा॑य॒ स्वाहेत्या॑ह।
अ॒द्भ्य ए॒वैनं॑ जुहोति।
वा॒यवे॒ स्वाहेत्या॑ह।
वा॒यव॑ ए॒वैनं॑ जुहोति॥ **23**॥

मि॒त्राय॒ स्वाहेत्या॑ह।
मि॒त्राये॒वैनं॑ जुहोति।
वरु॑णाय॒ स्वाहेत्या॑ह।
वरु॑णाये॒वैनं॑ जुहोति॥
ए॒ताभ्य॑ ए॒वैनं॑ दे॒वता॑भ्यो जुहोति।
दश॑दश स॒म्पादं॑ जुहोति।
दशा॑क्षरा वि॒राट्।
अन्नं॑ वि॒राट्।
वि॒राजै॒वान्ना॒द्यमव॑रुन्धे।
प्र वा ए॒षो॑ऽस्माल्लो॒काच्च्य॑वते।
यः परा॑चीरा॒हु॑तीर्जु॒होति॑।
पुन॑:पुनर॒भ्या॒वर्तं॑ जुहोति।
अ॒स्मिन्ने॒व लो॒के प्रति॑तिष्ठति।
ए॒ताग्ं ह॒ वाव सो॑ऽश्वमे॒धस्य॒ सग्ग्॒स्थि॑तिमुवा॒चास्कं॑न्दाय।

अस्कंन्नगं हि तत्।
यद्यज्ञस्य सग्ग्स्थिंतस्य स्कन्दंति॥ **24**॥

अभिजिंत्यै वैश्वानरः संवित्र एवैनं जुहोति
वायवं एवैनं जुहोति च्यवते षट्चं॥ **6**॥

प्रजापंतये त्वा जुष्टं प्रोक्षामीतिं पुरस्तांत्प्रत्यङ्क्तिष्ठन्प्रोक्षंति।
प्रजापंतिर्वै देवानांमन्नादो वीर्यावान्।
अन्नाद्यंमेवास्मिंन्वीर्यं दधाति।
तस्मादश्वंः पशूनामंन्नादो वीर्यावत्तमः॥
इन्द्राग्निभ्यां त्वेतिं दक्षिणतः।
इन्द्राग्नी वै देवानामोजिंष्ठौ बलिंष्ठौ।
ओजं एवास्मिन्बलं दधाति।
तस्मादश्वंः पशूनामोजिंष्ठो बलिंष्ठः।
वायवे त्वेतिं पश्चात्।
वायुर्वै देवानांमाशुः सांरसारितंमः॥ **25**॥

जवमेवास्मिंन्दधाति।
तस्मादश्वंः पशूनामाशुः सांरसारितंमः।
विश्वेंभ्यस्त्वा देवेभ्य इत्युंत्तरतः।
विश्वे वै देवा देवानां यशस्वितंमाः।
यशं एवास्मिंन्दधाति।
तस्मादश्वंः पशूनां यंशस्वितंमः।

दे॒वेभ्य॒स्त्वेत्य॒धस्ता॓त्।
दे॒वा वै दे॒वाना॒मप॑चिततमाः।
अप॑चितिमे॒वास्मि॒न्दधाति।
तस्मा॒दश्वः॑ पशू॒नामप॑चिततमः॥ **26**॥

सर्वे॓भ्यस्त्वा दे॒वेभ्य॒ इत्यु॒परि॑ष्टात्।
सर्वे॒ वै दे॒वास्त्विषि॑मन्तो हर॒स्विनः॑।
त्विषि॑मे॒वास्मि॒न् हरो॑ दधाति।
तस्मा॒दश्वः॑ पशू॒नां त्विषि॑मान् हर॒स्वित॑मः।
दि॒वे त्वा॒ऽन्तरि॑क्षाय त्वा पृथि॒व्यै त्वेत्या॑ह।
ए॒भ्य ए॒वैनं॑ लो॒केभ्य॒ः प्रोक्ष॑ति।
स॒ते त्वाऽस॑ते त्वा॒ऽद्भ्यस्त्वौष॑धीभ्यस्त्वा॒ विश्वे॓भ्यस्त्वा
भू॒तेभ्य॒ इत्या॑ह।
तस्मा॑दश्वमेधया॒जिन॒ग्ं॒ सर्वा॑णि भू॒तान्युप॑जीवन्ति।
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।
यत्प्रा॑जाप॒त्योऽश्वः॑।
अथ॒ कस्मा॑देनम॒न्याभ्यो॑ दे॒वता॒भ्योऽपि॒ प्रोक्ष॒तीति॑।
अश्वे॒ वै सर्वा॑ दे॒वता॑ अ॒न्वाय॑त्ताः।
तं यद्विश्वे॓भ्यस्त्वा भू॒तेभ्य॒ इति॑ प्रो॒क्षति॑।
दे॒वता॑ ए॒वास्मि॑न्न॒न्वाया॑तयति।
तस्मा॒दश्वे॒ सर्वा॑ दे॒वता॑ अ॒न्वाय॑त्ताः॥ **27**॥

सा॒र॒सा॒रि॒तमोप॑चिततमः प्राजाप॒त्योऽश्व॒ः पश्चं॑ च॥ 7॥

यथा॒ वै ह॒विषो॑ गृही॒तस्य॒ स्कन्द॑ति।
ए॒वं वा ए॒तदश्व॑स्य स्कन्दति।
यत्प्रोक्षि॑त॒मना॑लब्धमुथ्सृ॒जन्ति॑।
यद॑श्वचरि॒तानि॑ जु॒होति॑।
स॒र्व॒हु॒त॑मे॒वैनं॑ करो॒त्यस्क॑न्दाय।
अस्क॑न्न॒ग्ं॒ हि तत्।
यद्धु॒तस्य॒ स्कन्द॑ति।
इ॒ङ्गा॒रा॒य॒ स्वाहेङ्कृ॑ताय॒ स्वाहेत्या॑ह।
ए॒ता॒नि॒ वा अ॑श्वचरि॒तानि॑।
च॒रि॒तैरे॒वैन॒ग्ं॒ सम॑र्धयति॥ 28॥

तदा॑हुः।
अना॑हुतयो॒ वा अ॑श्वचरि॒तानि॑।
नैता हो॑त॒व्या॑ इति॑।
अथो॒ खल्वा॑हुः।
हो॒त॒व्या॑ ए॒व।
अत्र॒ वावैवं वि॒द्वान॑श्वमे॒धग्ं स॒ग्ग्स्था॑पयति।
यद॑श्वचरि॒तानि॑ जु॒होति॑।
तस्मा॑द्धोत॒व्या॑ इति॑।

ब॒हि॒र्धा वा ए॑नमे॒तदा॒यत॑नाद्दधाति।
भ्रातृ॑व्यमस्मै जनयति॥ 29॥

यस्या॑नायत॒ने॑ऽन्यत्रा॒ग्नेराहु॑तीर्जु॒होति॑।
सा॒वि॒त्रि॒या इष्ट्याः॑ पु॒रस्ता॑थ्स्विष्ट॒कृत॑ः।
आ॒ह॒व॒नीये॑ऽश्वचरि॒तानि॑ जुहोति।
आ॒यत॑न ए॒वास्याहु॑तीर्जु॒होति।
नास्मै॒ भ्रातृ॑व्यं जनयति।
तदा॑हुः।
य॒ज्ञ॒मु॒खेय॑ज्ञमुखे होत॒व्याः॑।
य॒ज्ञस्य॒ क्लृत्यै॑।
सु॒व॒र्गस्य॑ लो॒कस्यानु॑ख्यात्या॒ इति॑।
अथो॒ खल्वा॑हुः॥ 30॥

यद्य॑ज्ञमु॒खे य॑ज्ञमुखे जुहु॒यात्।
प॒शु॒भि॒र्यज॑माना॒ व्य॑र्धयेत्।
अव॑ सु॒व॒र्गाल्लो॒कात्प॑द्येत।
पापी॑यान्थ्स्या॒दिति॑।
स॒कृ॒दे॒व हो॑त॒व्याः॑।
न यज॑मानं प॒शु॒भि॒र्व्य॑र्धयति।
अ॒भि सु॑व॒र्गं लो॒कं ज॑यति।
न पापी॑यान्भवति।

अ॒ष्टाच॑त्वारिग्ं॒शतमश्वरू॒पाणि॑ जुहोति।
अ॒ष्टाच॑त्वारिग्ं॒शदक्षरा॒ जग॑ती।
जाग॒तोऽश्वः॑ प्राजाप॒त्यः सम॑द्ध्यै।
एक॒मति॑रिक्तं जुहोति।
तस्मा॒देकः॑ प्र॒जास्व॑र्धुकः॥ **31**॥

अ॒र्ध॒य॒ति॒ ज॒न॒य॒ति॒ खल्वा॑हु॒र्जग॑ती॒ त्रीणि॑ च॥ **8**॥

वि॒भूर्मा॒त्रा प्र॒भूः पि॒त्रेत्या॑ह।
इ॒यं वै मा॒ता।
अ॒सौ पि॒ता।
आ॒भ्यामे॒वैन॒ं परि॑ददाति।
अश्वो॑ऽसि॒ हयो॒ऽसीत्या॑ह।
शास्त्ये॒वैन॑मे॒तत्।
तस्मा॒च्छ्छि॒ष्टाः प्र॒जा जा॑यन्ते।
अत्यो॒ऽसीत्या॑ह।
तस्मा॒दश्वः॒ सर्वा॒न्प॒शूनत्ये॑ति।
तस्मा॒दश्वः॒ सर्वे॑षां प॒शू॒नाग् श्रैष्ठ्य॑ं गच्छति॥ **32**॥

प्र यश॒ः श्रैष्ठ्य॑माप्नोति।
य ए॒वं वेद॑।
नरो॒ऽस्यर्वा॑ऽसि॒ सप्ति॑रसि वा॒ज्य॑सीत्या॑ह।
रू॒पमे॒वास्यै॒तन्म॑हि॒मान॒ं व्याच॑ष्टे।

ययुर्नामाऽसीत्याह।
एतद्वा अश्वस्य प्रियं नामधेयम्।
प्रियेणैवैनं नामधेयेनाभिवदति।
तस्मादप्यामित्रौ सङ्गत्य।
नाम्ना चेद्ध्वयेते।
मित्रमेव भवतः॥ **33**॥

आदित्यानां पत्वान्विहीत्याह।
आदित्यानेवैनं गमयति।
अग्नये स्वाहा स्वाहेन्द्राग्निभ्यामिति पूर्वहोमाञ्जुहोति।
पूर्व एव द्विषन्तं भ्रातृव्यमतिक्रामति।
भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वेत्युथ्सृजति सर्वत्वाय।
देवा आशापाला एतं देवेभ्योश्वं मेधाय प्रोक्षितं गोपायतेत्याह।
शतं वै तल्प्या राजपुत्रा देवा आशापालाः।
तेभ्य एवैनं परिददाति।
ईश्वरो वा अश्वः प्रमुक्तः परां परावतं गन्तोः।
इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः
स्वाहेह रमतिः स्वाहेति चतृषु पथ्सु जुहोति॥ **34**॥

एता वा अश्वस्य बन्धनम्।
ताभिरेवैनं बध्नाति।
तस्मादश्वः प्रमुक्तो बन्धनमागच्छति।

तस्मा॒द॒श्वः॒ प्रमु॑क्तो॒ बन्ध॑नं॒ न ज॑हाति।
रा॒ष्ट्रं वा अ॑श्वमे॒धः।
रा॒ष्ट्रे खलु॒ वा ए॒ते व्याय॑च्छन्ते।
येऽश्वं॒ मेध्य॒ग्ं॒ रक्ष॑न्ति।
तेषा॒ं य उ॒दृच॒ं गच्छ॑न्ति।
रा॒ष्ट्राद्दे॒व ते रा॒ष्ट्रं ग॑च्छन्ति।
अथ॒ य उ॒दृच॒ं न गच्छ॑न्ति॥ **35**॥

रा॒ष्ट्राद्दे॒व ते व्यव॑च्छिद्यन्ते।
परा॒ वा ए॒ष सि॑च्यते।
यो॑ऽब॒लोँ॑ऽश्वमे॒धेन॒ यज॑ते।
यद॒मित्रा॒ अश्व॑ं वि॒न्देर॑न्।
हन्येता॑ऽस्य य॒ज्ञः।
च॒तु॒श्श॒ता र॑क्षन्ति।
य॒ज्ञस्याघा॑ताय।
अथा॒न्यमा॒नीय॒ प्रोक्षे॑युः।
सैव ततः॒ प्राय॑श्चित्तिः॥ **36**॥

गच्छ॒ति॒ भ॒व॒त॒ः प॒थ्सु जु॑होति॒ न गच्छ॑न्ति॒ नव॑ च॥ **9**॥

प्र॒जाप॑तिरकामयताश्वमे॒धेन॑ यजे॒येति॑।
स तपो॑ऽतप्यत।
तस्य॑ तेपा॒नस्य॑।



sunder kidambi prapatti dot com sunder kidambi

स॒प्तात्मनो॑ दे॒वता॒ उद॑क्रामन्न्।
सा दी॒क्षाऽभ॑वत्।
स ए॒तानि॑ वैश्वदे॒वान्य॑पश्यत्।
तान्य॑जुहोत्।
तैर्वै स दी॒क्षामवा॑रुन्ध।
यद्वै॒श्वदे॒वानि॑ जु॒होति॑।
दी॒क्षाme॒व तैर्यज॑मा॒नोऽव॑रुन्धे॥ 37॥

स॒प्त जु॑होति।
स॒प्त हि ता दे॒वता॑ उ॒दक्रा॑मन्न्।
अ॒न्व॒हं जु॑होति।
अ॒न्व॒हमे॒व दी॒क्षामव॑रुन्धे।
त्रीणि॑ वैश्वदे॒वानि॑ जुहोति।
च॒त्वार्यौ॑द्ग्रह॒णानि॑।
स॒प्त सम्प॑द्यन्ते।
स॒प्त वै शी॑र्ष॒ण्याः॑ प्रा॒णाः।
प्रा॒णा दी॒क्षा।
प्रा॒णैरे॒व प्रा॒णान्दी॒क्षामव॑रुन्धे॥ 38॥

एक॑विग्ं॒शतिं वैश्वदे॒वानि॑ जुहोति।
एक॑विग्ं॒शति॒र्वै दे॑वलो॒काः।
द्वाद॑श॒ मासा॒ः पञ्च॒र्तव॑ः।

त्रय॑ इ॒मे लो॒काः।
अ॒सावा॑दि॒त्य ए॑कवि॒ꣳ॒शः।
ए॒ष सु॑व॒र्गो लो॒कः।
तद्दैव्यं॑ क्ष॒त्रम्।
सा श्रीः।
तद्ब्र॒ध्नस्य॑ वि॒ष्टप᳚म्।
तथ्स्वारा᳚ज्यमुच्यते॥ **39**॥

त्रि॒ꣳ॒शत॑मौद्ग्रह॒णानि॑ जुहोति।
त्रि॒ꣳ॒शद॑क्षरा वि॒राट्।
अन्नं॑ वि॒राट्।
वि॒रा॒जैवान्ना॒द्यमव॑रुन्धे।
त्रे॒धा वि॒भज्य॑ दे॒वता᳚ जुहोति।
त्र्या॑वृतो॒ वै दे॒वाः।
त्र्या॑वृत इ॒मे लो॒काः।
ए॒षां लो॒काना॒माप्त्यै᳚।
ए॒षां लो॒काना॒ं क्लृप्त्यै᳚।
अप॒ वा ए॒तस्मा᳚त्प्रा॒णाः क्रा॑मन्ति॥ **40**॥

यो दी॒क्षाम॑तिरे॒चय॑ति।
स॒प्ता॒हं प्रच॑रन्ति।
स॒प्त वै शी॑र्॒ष॒ण्याः᳚ प्रा॒णाः।

प्रा॒णा दी॒क्षा।
प्रा॒णैरे॒व प्रा॒णान्दी॒क्षामव॑रुन्धे।
पू॒र्णा॒हु॒तिमु॑त्त॒मां जु॑होति।
सर्वं॒ वै पू॑र्णाहु॒तिः।
सर्व॑मे॒वाप्नो॑ति।
अथो॑ इ॒यं वै पू॑र्णाहु॒तिः।
अ॒स्यामे॒व प्रति॑तिष्ठति॥ **41**॥

रु॒न्धे॒ प्रा॒णान्दी॒क्षामव॑रुन्ध उच्यते क्रामन्ति तिष्ठति॥ **10**॥

प्र॒जाप॑तिरश्वमे॒धम॑सृजत।
तग्ं सृ॒ष्टं न किञ्च॒नोद॑यच्छत्।
तं वै॑श्वदे॒वान्ये॒वोद॑यच्छन्न्।
यद्वै॑श्वदे॒वानि॑ जु॒होति॑।
य॒ज्ञस्योद्य॑त्यै।
स्वाहा॒ऽऽधिमाधी॑ताय॒ स्वाहा॑।
स्वाहाऽऽधी॑त॒ मन॑से॒ स्वाहा॑।
स्वाहा॒ मनः॑ प्र॒जाप॑तये॒ स्वाहा॑।
काय॒ स्वाहा॒ कस्मै॒ स्वाहा॑ क॒त॒मस्मै॒ स्वाहेति॑
प्राजाप॒त्ये मु॒ख्ये॑ भवतः।
प्र॒जाप॑तिमुखाभिरे॒वैन॑ दे॒वता॑भि॒रुद्य॑च्छते॥ **42**॥

अदि॑त्यै॒ स्वाहाऽदि॑त्यै म॒ह्यै॑ स्वाहाऽदि॑त्यै सुमृडी॒कायै॒ स्वाहेत्या॑ह।
इ॒यं वा अदि॑तिः।
अ॒स्या ए॒वैनं॑ प्रति॒ष्ठायोद्यं॑च्छते।
सर॑स्वत्यै॒ स्वाहा॒ सर॑स्वत्यै बृह॒त्यै॑ स्वाहा॒ सर॑स्वत्यै
पाव॒कायै॒ स्वाहेत्या॑ह।
वाग्वै सर॑स्वती।
वा॒चैवैन॒मुद्यं॑च्छते।
पू॒ष्णे स्वाहा॑ पू॒ष्णे प्र॑प॒थ्या॑य॒ स्वाहा॑ पू॒ष्णे न॒रन्धि॑षाय॒ स्वहेत्या॑ह।
प॒शवो॒ वै पू॒षा।
प॒शुभि॑रे॒वैन॒मुद्यं॑च्छते।
त्वष्ट्रे॒ स्वाहा॒ त्वष्ट्रे॑ तु॒रीपा॑य॒ स्वाहा॒ त्वष्ट्रे॑ पु॒रु॒रूपा॑य॒ स्वाहेत्या॑ह।
त्वष्टा॒ वै प॑शू॒नां मि॑थु॒नाना॑ग्ं रू॒प॒कृत्।
रू॒प॒मे॒व प॒शुषु॑ दधाति।
अथो॑ रू॒पैरे॒वैन॒मुद्यं॑च्छते।
विष्ण॑वे॒ स्वाहा॒ विष्ण॑वे निखु॒र्य॒पाय॒ स्वाहा॒ विष्ण॑वे
निभू॒य॒पाय॒ स्वाहेत्या॑ह।
य॒ज्ञो वै विष्णुः॑।
य॒ज्ञायै॒वैन॒मुद्यं॑च्छते।
पू॒र्णा॒हु॒तिमु॑त्त॒मां जु॑होति।
प्रत्यु॑त्त॑ब्ध्यै सय॒त्वाय॑॥ **43**॥

यच्छुते पुरुरूपाय स्वाहेत्याहाष्टौ च॥ **11**॥

सावित्रमष्टाकपालं प्रातर्निर्वपति।
अष्टाक्षरा गायत्री।
गायत्रं प्रातस्सवनम्।
प्रातस्सवनादेवैनं गायत्रियाश्छन्दसोऽधि निर्मिमीते।
अथो प्रातस्सवनमेव तेनाप्नोति।
गायत्रीं छन्दः।
सवित्रे प्रसवित्र एकादशकपालं मध्यन्दिने।
एकादशाक्षरा त्रिष्टुप्।
त्रैष्टुभं माध्यन्दिनगं सवनम्।
माध्यन्दिनादेवैनगं सवनात्त्रिष्टुभश्छन्दसोऽधि निर्मिमीते॥ **44**॥

अथो माध्यन्दिनमेव सवनं तेनाप्नोति।
त्रिष्टुभं छन्दः।
सवित्र आसवित्रे द्वादशकपालमपराह्णे।
द्वादशाक्षरा जगती।
जागतं तृतीयसवनम्।
तृतीयसवनादेवैनं जगत्याश्छन्दसोऽधि निर्मिमीते।
अथो तृतीयसवनमेव तेनाप्नोति।
जगतीं छन्दः।
ईश्वरो वा अश्वः प्रमुक्तः परां परावतं गन्तोः।



prapatti dot com
sunder kidāmbi

इ॒ह धृति॒ः स्वाहे॒ह विधृ॑ति॒ः स्वाहे॒ह रन्ति॒ः स्वाहे॒ह रम॑ति॒ः
स्वाहेति॒ चत॑स्र॒ आहु॑तीर्जुहोति॥ **45**॥

चत॑स्रो॒ दिश॑ः।
दि॒ग्भिरे॒वैन॒ं परि॑गृह्णाति।
आश्व॑त्थो व्र॒जो भ॑वति।
प्र॒जाप॑तिर्दे॒वेभ्यो॒ निला॑यत।
अश्वो॑ रू॒पं कृ॒त्वा।
सो॑ऽश्व॒त्थे सं॑वथ्स॒रम॑तिष्ठत्।
तद॑श्व॒त्थस्या॑श्वत्थ॒त्वम्।
यदाश्व॑त्थो व्र॒जो भव॑ति।
स्व ए॒वैन॒ं योनौ॒ प्रति॑ष्ठापयति॥ **46**॥

त्रि॒ष्टु॒भ॒श्छन्द॒सोऽधि॒ निर्मि॑मीते जु॒होति॒ नव॑ च॥ **12**॥

आ ब्रह्म॑न्ब्राह्म॒णो ब्र॑ह्मवर्च॒सी जा॑यता॒मित्या॑ह।
ब्रा॒ह्म॒ण ए॒व ब्र॑ह्मवर्च॒सं द॑धाति।
तस्मा॑त्पु॒रा ब्रा॑ह्म॒णो ब्र॑ह्मवर्च॒स्य॑जायत।
आऽस्मिन्रा॒ष्ट्रे रा॑ज॒न्य॑ इष॒व्य॑ः शूरो॑ महार॒थो जा॑यता॒मित्या॑ह।
रा॒ज॒न्य॑ ए॒व शौ॒र्यं म॑हि॒मान॑ं दधाति।
तस्मा॑त्पु॒रा रा॑ज॒न्य॑ इष॒व्य॑ः शूरो॑ महार॒थो॑ऽजायत।
दोग्ध्री॑ धे॒नुरित्या॑ह।
धे॒न्वामे॒व पयो॑ दधाति।

तस्माँत्पुरा दोग्ध्रीं धेनुरंजायत।
वोढांऽनड्वानित्यांह॥ **47**॥

अनडुह्येव वीर्यं दधाति।
तस्माँत्पुरा वोढांऽनड्वानंजायत।
आशुः सप्तिरित्यांह।
अश्वं एव जवं दंधाति।
तस्माँत्पुराऽऽशुरश्वोंऽजायत।
पुरंन्धिर्योषेत्यांह।
योषित्येव रूपं दंधाति।
तस्माथ्स्त्री युंवतिः प्रिया भावुंका।
जिष्णू रंथेष्ठा इत्यांह।
आ ह वै तत्रं जिष्णू रंथेष्ठा जांयते॥ **48**॥

यत्रैतेनं यज्ञेन यजंन्ते।
सभेयो युवेत्यांह।
यो वै पूँर्ववयसी।
स सभेयो युवाँ।
तस्माद्युवा पुमाँन्प्रियो भावुंकः।
आऽस्य यजंमानस्य वीरो जांयतामित्यांह।
आ ह वै तत्र यजंमानस्य वीरो जांयते।
यत्रैतेनं यज्ञेन यजंन्ते।

नि॒का॒मे नि॑कामे नः प॒र्जन्यो॑ व॒र्ष॒त्वित्या॑ह।
नि॒का॒मे नि॑कामे ह॒ वै तत्र॑ प॒र्जन्यो॑ व॒र्षति।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
फ॒लिन्यो॑ न॒ ओष॑धयः पच्यन्ता॒मित्या॑ह।
फ॒लिन्यो॑ ह॒ वै तत्रौष॑धयः पच्यन्ते।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते।
यो॒ग॒क्षे॒मो नः॑ कल्पता॒मित्या॑ह।
कल्प॑ते ह॒ वै तत्र॑ प्र॒जाभ्यो॑ योगक्षे॒मः।
यत्रै॒तेन॑ य॒ज्ञेन॒ यज॑न्ते॥ **49**॥

अ॒न॒ड्वानित्या॑ह जायते व॒र्षति स॒प्त च॑॥ **13**॥

प्र॒जाप॑तिर्दे॒वेभ्यो॑ य॒ज्ञान्व्यादि॑शत्।
स आ॒त्मन्न॑श्वमे॒धम॑धत्त।
तं दे॒वा अ॑ब्रुवन्न्।
ए॒ष वाव य॒ज्ञः।
यद॑श्वमे॒धः।
अप्ये॒व नोऽत्रा॒स्त्विति॑।
तेभ्य॑ ए॒तान॑न्नहो॒मान्प्राय॑च्छत्।
तान॑जुहोत्।
तैर्वै स दे॒वान॑प्रीणात्।
यद॑न्नहो॒माञ्जु॒होति॑॥ **50**॥

दे॒वाने॒व तैर्यज॑मानः प्रीणाति।
आज्ये॑न जु॒होति।
अ॒ग्नेर्वा ए॒तद्रू॒पम्।
यदाज्यँ॑म्।
यदाज्ये॑न जु॒होति॑।
अ॒ग्निमे॒व तत्प्री॑णाति।
मधु॑ना जु॒होति।
म॒ह॒त्यै वा ए॒तद्दे॒वता॑यै रू॒पम्।
यन्मधु॑।
यन्मधु॑ना जु॒होति॑॥ **51** ॥

म॒ह॒तीमे॒व तद्दे॒वताँ॑ प्रीणाति।
त॒ण्डु॒लैर्जु॑होति।
वसू॑ना॒ं वा ए॒तद्रू॒पम्।
यत्त॑ण्डु॒लाः।
यत्त॑ण्डु॒लैर्जु॒होति॑।
वसू॑ने॒व तत्प्री॑णाति।
पृथु॑कैर्जु॑होति।
रु॒द्राणा॒ं वा ए॒तद्रू॒पम्।
यत्पृथु॑काः।
यत्पृथु॑कैर्जु॒होति॑॥ **52** ॥

रु॒द्राने॒व तत्प्री॑णाति।

ला॒जैर्जु॑होति।

आ॒दि॒त्यानां॒ वा ए॒तद्रू॒पम्।

यल्ला॒जाः।

यल्ला॒जैर्जु॒होति॑।

आ॒दि॒त्याने॒व तत्प्री॑णाति।

क॒रम्बै᳚र्जुहोति।

विश्वे॑षां॒ वा ए॒तद्दे॒वाना॒ग्ं॒ रू॒पम्।

यत्क॒रम्बाः᳚।

यत्क॒रम्बै᳚र्जु॒होति॑॥ **53**॥

विश्वा॑ने॒व तद्दे॒वान्प्री॑णाति।

धा॒नाभि॑र्जु॒होति।

नक्ष॑त्राणां॒ वा ए॒तद्रू॒पम्।

यद्धा॒नाः।

यद्धा॒नाभि॑र्जु॒होति॑।

नक्ष॑त्राण्ये॒व तत्प्री॑णाति।

सक्तु॑भिर्जुहोति।

प्र॒जाप॑ते॒र्वा ए॒तद्रू॒पम्।

यथ्सक्त॑वः।

यथ्सक्तु॑भिर्जु॒होति॑॥ **54**॥

प्रजापतिमेव तत्प्रीणाति।
मसूस्यैर्जुहोति।
सर्वासां वा एतद्देवतानागं रूपम्।
यन्मसूस्यानि।
यन्मसूस्यैर्जुहोति।
सर्वा एव तद्देवताः प्रीणाति।
प्रियङ्गुतण्डुलैर्जुहोति।
प्रियाङ्गा ह वै नामैते।
एतैर्वै देवा अश्वस्याङ्गानि समदधुः।
यत्प्रियङ्गुतण्डुलैर्जुहोति।
अश्वस्यैवाङ्गानि सन्दधाति।
दशान्नानि जुहोति।
दशाक्षरा विराट्।
विराट्कृत्स्नस्यान्नाद्यस्यावरुद्ध्यै॥ **55**॥

जुहोति मधुना जुहोति पृथुकैर्जुहोति करम्भैर्जुहोति
सक्तुभिर्जुहोति प्रियङ्गुतण्डुलैर्जुहोति चत्वारि च॥ **14**॥

अन्नहोमानाज्येनाग्नेर्मधुना तण्डुलैः पृथुकैर्लाजैः
करम्भैर्धानाभिः सक्तुभिर्मसूस्यैः प्रियङ्गुतण्डुलैर्दशान्नानि द्वादश॥

प्रजापतिरश्वमेधमसृजत।
तगं सृष्टगं रक्षागंस्यजिघागंसन्।

स ए॒तान्प्र॒जाप॑तिर्नक्तग्ं हो॒मान॑पश्यत्।
तान॑जुहोत्।
तैर्वै स य॒ज्ञाद्रक्षा॒ग्॒स्यपा॑हन्न्।
यन्न॑क्तग्ं॒हो॒माञ्जु॒होति॑।
य॒ज्ञादे॒व तैर्यज॑मानो॒ रक्षा॒ग्॒स्यप॑हन्ति।
आज्ये॑न जुहोति।
वज्रो॒ वा आज्यँ॑म्।
वज्रे॑णै॒व य॒ज्ञाद्रक्षा॒ग्॒स्यप॑हन्ति॥ **56**॥

आज्य॑स्य प्रति॒पदं॑ करोति।
प्रा॒णो वा आज्यँ॑म्।
मु॒ख॒त ए॒वास्य॑ प्रा॒णं द॑धाति।
अ॒न्न॒हो॒माञ्जु॑होति।
शरी॑रव॒देवाव॑रुन्धे।
व्य॒त्यासं॑ जुहोति।
उ॒भय॒स्याव॑रुध्यै।
नक्तं॑ जुहोति।
रक्षं॑सा॒मप॑हत्यै।
आज्ये॑नान्त॒तो जु॑होति॥ **57**॥

प्रा॒णो वा आज्यँ॑म्।
उ॒भ॒यत॑ ए॒वास्य॑ प्रा॒णं द॑धाति।

पु॒रस्ता᳚च्चो॒परि॑ष्टाच्च।

एक॑स्मै॒ स्वाहेत्या॑ह।

अ॒स्मिन्ने॒व लो॒के प्रति॑तिष्ठति।

द्वाभ्या॒ग्॒ स्वाहेत्या॑ह।

अ॒मुष्मि॑न्ने॒व लो॒के प्रति॑तिष्ठति।

उ॒भयो॑रे॒व लो॒कयोः॒ प्रति॑तिष्ठति।

अ॒स्मिग्ग्॒श्चा॒मुष्मिग्ग्॑श्च।

श॒ताय॒ स्वाहेत्या॑ह।

श॒तायु॒र्वै पुरु॑षः श॒तवी᳚र्यः।

आयु॑रे॒व वी॒र्य॑मव॑रुन्धे।

स॒हस्रा॑य॒ स्वाहेत्या॑ह।

आयु॒र्वै स॒हस्र᳚म्।

आयु॑रे॒वाव॑रुन्धे।

सर्व॑स्मै॒ स्वाहेत्या॑ह।

अप॑रिमितमे॒वाव॑रुन्धे॥ **58**॥

ए॒व य॒ज्ञाद्रक्षा॒ग्॒स्यप॑हन्त्यन्त॒तो जु॑होति
श॒ताय॒ स्वाहेत्या॑ह स॒प्त च॑॥ **15**॥

प्र॒जाप॑तिं॒ वा ए॒ष ई᳚प्स॒तीत्या॑हुः।

यो᳚ऽश्वमे॒धेन॒ यज॑त॒ इति॑।

अथो॑ आहुः।

सर्वा॑णि भू॒तानीति॑।
एक॑स्मै॒ स्वाहेत्या॑ह।
प्र॒जाप॑ति॒र्वा एकः॑।
तमे॒वाप्नो॑ति।
एक॑स्मै॒ स्वाहा॒ द्वाभ्या॒ग्॒ स्वाहेत्य॑भिपू॒र्वमाहु॑तीर्जुहोति।
अ॒भि॒पू॒र्वमे॒व सु॑व॒र्गं लो॒कमे॑ति।
ए॒को॒त्त॒रं जु॑होति॥ **59**॥

ए॒कु॒वदे॒व सु॑व॒र्गं लो॒कमे॑ति।
सन्त॑तं जुहोति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सन्त॑त्यै।
श॒ताय॒ स्वाहेत्या॑ह।
श॒तायु॑र्वै पुरु॑षः श॒तवी॑र्यः।
आयु॑रे॒व वी॒र्य॑मव॑रुन्धे।
स॒हस्रा॑य॒ स्वाहेत्या॑ह।
आयु॒र्वै स॒हस्र॑म्।
आयु॑रे॒वाव॑रुन्धे।
अ॒युता॑य॒ स्वाहा॑ नि॒युता॑य॒ स्वाहा॑ प्र॒युता॑य॒ स्वाहेत्या॑ह॥ **60**॥

त्रय॑ इ॒मे लो॒काः।
इ॒मा॒नेव लो॒कानव॑रुन्धे।
अर्बु॑दाय॒ स्वाहेत्या॑ह।

वाग्वा अर्बुदम्।
वाचमेवावरुन्धे।
न्यर्बुदाय स्वाहेत्याह।
यो वै वाचो भूमा।
तन्न्यर्बुदम्।
वाच एव भूमानमवरुन्धे।
समुद्राय स्वाहेत्याह॥ **61**॥

समुद्रमेवाप्नोति।
मध्याय स्वाहेत्याह।
मध्यमेवाप्नोति।
अन्ताय स्वाहेत्याह।
अन्तमेवाप्नोति।
परार्धाय स्वाहेत्याह।
परार्धमेवाप्नोति।
उषसे स्वाहा व्युष्ट्यै स्वाहेत्याह।
रात्रिर्वा उषाः।
अहर्व्युष्टिः।
अहोरात्रे एवावरुन्धे।
अथो अहोरात्रयोरेव प्रतितिष्ठति।
ता यदुभयीर्दिवा वा नक्तं वा जुहुयात्।

अ॒हो॒रा॒त्रे मो॑हयेत्।
उ॒षसे॒ स्वाहा॒ व्यु॑ष्ट्यै॒ स्वाहो॑देष्य॒ते स्वाहो॑द्य॒ते स्वाहेत्यनु॑दिते जुहोति।
उदि॑ताय॒ स्वाहा॑ सुव॒र्गाय॒ स्वाहा॑ लो॒काय॒ स्वाहेत्युदि॑ते जुहोति।
अ॒हो॒रा॒त्रयो॒रव्य॑तिमोहाय॥ **62**॥

एको॒त्त॒रं जु॑होति प्र॒युता॑य॒ स्वाहेत्या॑ह समु॒द्राय॒
स्वाहेत्या॒हाह॒र्व्यु॑ष्टिः स॒प्त च॑॥ **16**॥

वि॒भूर्मा॒त्रा प्र॒भूः पि॒त्रेत्य॑श्वना॒मानि॑ जुहोति।
उ॒भयो॑रे॒वैनं॑ लो॒कयो॑र्नाम॒धेयं॑ गमयति।
आय॑नाय॒ स्वाहा॒ प्राय॑णाय॒ स्वाहेत्यु॑द्द्रा॒वाञ्जु॑होति।
सर्व॑मे॒वैन॒मस्क॑न्नगं॒ सुव॒र्गं लो॒कं ग॑मयति।
अ॒ग्नये॒ स्वाहा॒ सोमा॑य॒ स्वाहेति॑ पूर्वहो॒माञ्जु॑होति।
पूर्व॑ ए॒व द्वि॒षन्तं॒ भ्रातृ॑व्यमति॑क्रामति।
पृ॒थि॒व्यै स्वाहा॒ऽन्तरि॑क्षाय॒ स्वाहेत्या॑ह।
य॒था॒ य॒जु॒रे॒वैतत्।
अ॒ग्नये॒ स्वाहा॒ सोमा॑य॒ स्वाहेति॑ पूर्वदी॒क्षा जु॑होति।
पूर्व॑ ए॒व द्वि॒षन्तं॒ भ्रातृ॑व्यमति॑क्रामति॥ **63**॥

पृ॒थि॒व्यै स्वाहा॒ऽन्तरि॑क्षाय॒ स्वाहेत्ये॑कवि॒ग्ं॒शिनीं॑ दी॒क्षां जु॑होति।
एक॑विग्ंशति॒र्वै दे॑वलो॒काः।
द्वाद॑श॒ मासा॒ः पञ्च॒र्तव॑ः।
त्रय॑ इ॒मे लो॒काः।

असावादित्य एकविंशः।
एष सुवर्गो लोकः।
सुवर्गस्य लोकस्य समष्ट्यै।
भुवो देवानां कर्मणेत्यृतुदीक्षा जुहोति।
ऋतूनेवास्मै कल्पयति।
अग्नये स्वाहा वायवे स्वाहेति जुहोत्यनन्तरित्यै॥ 64॥

अर्वाङ्यज्ञः सङ्क्रामत्वित्याप्तीर्जुहोति।
सुवर्गस्य लोकस्याप्त्यै।
भूतं भव्यं भविष्यदिति पर्याप्तीर्जुहोति।
सुवर्गस्य लोकस्य पर्याप्त्यै।
आ मे गृहा भवन्त्वित्याभूर्जुहोति।
सुवर्गस्य लोकस्याभूत्यै।
अग्निना तपोऽन्वभवदित्यनुभूर्जुहोति।
सुवर्गस्य लोकस्यानुभूत्यै।
स्वाहाऽऽधिमाधीताय स्वाहेति समस्तानि वैश्वदेवानि जुहोति।
समस्तमेव द्विषन्तं भ्रातृव्यमतिक्रामति॥ 65॥

दद्भ्यः स्वाहा हनूभ्याग् स्वाहेत्यङ्गहोमाञ्जुहोति।
अङ्गे अङ्गे वै पुरुषस्य पाप्मोपश्लिष्टः।
अङ्गादङ्गादेवैनं पाप्मनस्तेन मुञ्चति।
अञ्ज्येताय स्वाहा कृष्णाय स्वाहा श्वेताय

स्वाहेत्यंश्वरूपाणिं जुहोति।
रूपैरेवैनगं समंर्धयति।
ओषंधीभ्यः स्वाहा मूलैंभ्यः स्वाहेत्योंषधिहोमाञ्जुंहोति।
द्वय्यो वा ओषंधयः।
पुष्पेंभ्योऽन्याः फलं गृह्णन्तिं।
मूलेंभ्योऽन्याः।
ता एवोभयीरवंरुन्धे॥ **66**॥

वनस्पतिंभ्यः स्वाहेतिं वनस्पतिहोमाञ्जुंहोति।
आरण्यस्यान्नाद्यस्यावंरुध्यै।
मेषस्त्वां पचतैरंवत्वित्यपांव्यानि जुहोति।
प्राणा वै देवा अपांव्याः।
प्राणानेवावंरुन्धे।
कूप्यांभ्यः स्वाहाऽद्भ्यः स्वाहेत्यपागं होमांञ्जुहोति।
अप्सु वा आपंः।
अन्नं वा आपंः।
अद्भ्यो वा अन्नं जायते।
यदेवाद्भ्योऽन्नं जायंते।
तदवंरुन्धे॥ **67**॥

पूर्वदीक्षा जुंहोति पूर्व एव द्विषन्तं भ्रातृंव्यमतिंक्रामत्यनंन्तरित्यै
क्रामति रुन्धे जायंत एकं च॥ **17**॥

अम्भार्ग्ंसि जुहोति।
अ॒यं वै लो॒कोऽम्भार्ग्ंसि।
तस्य॒ वस॒वोऽधिपतयः।
अ॒ग्निर्ज्योतिः।
यदम्भार्ग्ंसि जु॒होति।
इ॒ममे॒व लो॒कमवरुन्धे।
वसू॒नाग्॒ं सायुज्यं गच्छति।
अ॒ग्निं ज्योति॒रवरुन्धे।
नभार्ग्ंसि जुहोति।
अ॒न्तरिक्षं वै नभार्ग्ंसि॥ **68**॥

तस्य रु॒द्रा अधिपतयः।
वा॒युर्ज्योतिः।
यन्नभार्ग्ंसि जु॒होति।
अ॒न्तरिक्षमे॒वावरुन्धे।
रु॒द्राणा॒ग्॒ं सायुज्यं गच्छति।
वा॒युं ज्योति॒रवरुन्धे।
महार्ग्ंसि जुहोति।
अ॒सौ वै लो॒को महार्ग्ंसि।
तस्यादि॒त्या अधिपतयः।
सूर्यो॒ ज्योतिः॥ **69**॥

यन्महाग्ं॑सि जु॒होति॑।
अ॒मुमे॒व लो॒कमव॑रुन्धे।
आ॒दि॒त्याना॒ग्ं॒ सायु॑ज्यं गच्छति।
सूर्यं॒ ज्योति॒रव॑रुन्धे।
नमो॒ राज्ञे॒ नमो॒ वरु॑णा॒येति॑ य॒व्यानि॑ जुहोति।
अ॒न्नाद्य॒स्याव॑रुध्यै।
म॒यो॒भूर्वातो॑ अ॒भि वा॑तू॒स्रा इति॑ ग॒व्यानि॑ जुहोति।
प॒शू॒नामव॑रुध्यै।
प्रा॒णाय॒ स्वाहा᳚ व्या॒नाय॒ स्वाहेति॑ सन्ततिहो॒माञ्जु॑होति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सन्त॑त्यै॥ **70**॥

सि॒ताय॒ स्वाहाऽसि॑ताय॒ स्वाहेति॒ प्रमु॑क्तीर्जुहोति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ प्रमु॑क्त्यै।
पृ॒थि॒व्यै स्वाहा॒ऽन्तरि॑क्षाय॒ स्वाहेत्या॑ह।
य॒था॒ य॒जु॒रे॒वैतत्।
द॒त्वते॒ स्वाहा॑ऽद॒न्तका॑य॒ स्वाहेति॑ शरीरहो॒माञ्जु॑होति।
पि॒तृ॒लो॒कमे॒व तैर्यज॑मा॒नोऽव॑रुन्धे।
कस्त्वा॑ युनक्ति॒ स त्वा॑ युन॒क्त्विति॑ परि॒धीन् यु॑नक्ति।
इ॒मे वै लो॒काः प॑रि॒धय॑ः।
इ॒मा॒ने॒वास्मै॑ लो॒कान् यु॑नक्ति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै॥ **71**॥

Sunder Kidambi
prapatti dot com
Sunder Kidambi

यः प्राणतो य आत्मदा इति महिमानौ जुहोति।
सुवर्गो वै लोको महः।
सुवर्गमेव ताभ्यां लोकं यजमानोऽवरुन्धे।
आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामिति समस्तानि
ब्रह्मवर्चसानि जुहोति।
ब्रह्मवर्चसमेव तैर्यजमानोऽवरुन्धे।
जज्ञि बीजमिति जुहोत्यनन्तरित्यै।
अग्नये समनमत्पृथिव्यै समनमदिति सन्नतिहोमाञ्जुहोति।
सुवर्गस्य लोकस्य सन्नत्यै।
भूताय स्वाहा भविष्यते स्वाहेति भूताभव्यौ होमौ जुहोति।
अयं वै लोको भूतम्॥ 72॥

असौ भविष्यत्।
अनयोरेव लोकयोः प्रतितिष्ठति।
सर्वस्याप्त्यै।
सर्वस्यावरुद्ध्यै।
यदक्रन्दः प्रथमं जायमान इत्यश्वस्तोमीयं जुहोति।
सर्वस्याप्त्यै।
सर्वस्य जित्यै।
सर्वमेव तेनाप्नोति।

सर्वं᳚ जयति।
योऽ᳚श्वमे॒धेन॒ यज॑ते॥ 73॥

य उ॑ चैनमे॒वं वेद॑।
य॒ज्ञग्ं रक्षाग्॑स्यजिघाग्ंसन्न्।
स ए॒तान्प्र॒जाप॑तिर्नक्तग्ंहो॒मान॑पश्यत्।
तान॑जुहोत्।
तैर्वै स य॒ज्ञाद्रक्षा॒ग्॒स्यपा॑हन्न्।
यन्न॑क्तग्ंहो॒माञ्जु॒होति॑।
य॒ज्ञादे॒व तैर्यज॑मानो॒ रक्षा॒ग्॒स्यप॑हन्ति।
उ॒षसे॒ स्वाहा॒ व्यु॑ष्ट्यै॒ स्वाहेत्य॑न्त॒तो जु॑होति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै॥ 74॥

वै नभाग्॑सि॒ सूर्यो॒ ज्योति॒ः सन्त॑त्यै॒
समष्ट्यै भू॒तं यज॑ते॒ नव॑ च॥ 18॥

ए॒क॒यू॒पो वैका॑द॒शिनी॑ वा।
अ॒न्येषा᳚ं य॒ज्ञाना॒ं यूपा॑ भवन्ति।
ए॒क॒वि॒ग्ं॒शिन्य॑श्वमे॒धस्य॑।
सु॒व॒र्गस्य॑ लो॒कस्या॒भिजि॑त्यै।
बै॒ल्॒वो वा॑ खादि॒रो वा॑ पाला॒शो वा᳚।
अ॒न्येषा᳚ं यज्ञक्रतू॒नां यूपा॑ भवन्ति।
राज्जु॑दाल॒ एक॑विग्ंशत्यरत्निरश्वमे॒धस्य॑।

सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
नान्येषा᳚ं पशू॒नां ते॑ज॒न्या अ॑व॒द्यन्ति॑।
अव॑द्य॒न्त्यश्व॑स्य॥ 75॥

पा॒प्मा वै ते॑ज॒नी।
पा॒प्मनोऽप॑हत्यै।
प्ल॒क्ष॒शा॒खाया॑म॒न्येषा᳚ं पशू॒नाम॑व॒द्यन्ति॑।
वे॒त॒स॒शा॒खाया॒मश्व॑स्य।
अ॒प्सुयो॑नि॒र्वा अश्वः॑।
अ॒प्सु॒जो वे॑त॒सः।
स्व ए॒वास्य॒ योना॒वव॑द्यति।
यूपे॑षु ग्रा॒म्यान्प॒शून्नि॑यु॒ञ्जन्ति॑।
आ॒रो॒केष्वा॑र॒ण्यान्धा॑रयन्ति।
प॒शू॒नां व्यावृ॑त्यै।
आ ग्रा॒म्यान्प॒शून्लभ॑न्ते।
प्रार॒ण्यान्थ्सृ॑जन्ति।
पा॒प्मनोऽप॑हत्यै॥ 76॥

अश्व॑स्य॒ व्यावृ॑त्त्यै॒ त्रीणि॑ च॥ 19॥

राज्जु॑दालमग्नि॒ष्ठं मि॑नोति।
भ्रू॒ण॒ह॒त्याया॒ अप॑हत्यै।
पौतु॑द्रवाव॒भितो॑ भवतः।

sunder kidāmbi prapatti dot com sunder kidāmbi

पुण्यस्य गन्धस्यावरुध्यै।
भ्रूणहत्यामेवास्मादपहत्य।
पुण्येन गन्धेनोभयतः परिगृह्णाति।
षड्बैल्वा भवन्ति।
ब्रह्मवर्चसस्यावरुद्ध्यै।
षड्वादिराः।
तेजसोऽवरुध्यै॥ 77॥

षड्वालाशाः।
सोमपीथस्यावरुध्यै।
एकविंशतिः सम्पद्यन्ते।
एकविंशतिर्वै देवलोकाः।
द्वादश मासाः पञ्चर्तवः।
त्रय इमे लोकाः।
असावादित्य एकविंशः।
एष सुवर्गो लोकः।
सुवर्गस्य लोकस्य समष्ट्यै।
शतं पशवो भवन्ति॥ 78॥

शतायुः पुरुषः शतेन्द्रियः।
आयुष्येवेन्द्रिये प्रतितिष्ठति।
सर्वं वा अश्वमेध्याप्नोति।

sunder kidāmbi
prapatti dot com
sunder kidāmbi

अपरिमिता भवन्ति।
अपरिमितस्यावरुद्ध्यै।
ब्रह्मवादिनो वदन्ति।
कस्मात्सत्यात्।
दक्षिणतोऽन्येषां पशूनामवद्यन्ति।
उत्तरतोऽश्वस्येति।
वारुणो वा अश्वः॥ 79॥

एषा वै वरुणस्य दिक्।
स्वायामेवास्य दिश्यवद्यति।
यदितरेषां पशूनामवद्यति।
शतदेवत्यं तेनावरुन्धे।
चितेऽग्नावधिवैतसे कटेऽश्वं चिनोति।
अप्सुयोनिर्वा अश्वः।
अप्सुजो वेतसः।
स्व एवैनं योनौ प्रतिष्ठापयति।
पुरस्तात्प्रत्यञ्चं तूपरं चिनोति।
पश्चात्प्राचीनं गोमृगम्॥ 80॥

प्राणापानावेवास्मिन्त्सम्यञ्चौ दधाति।
अश्वं तूपरं गोमृगमिति सर्वहुत एताञ्जुहोति।
एषां लोकानामभिजित्यै।

आ॒त्मना॒ऽभिजु॑होति।
सा॒त्मा॑नमे॒वैन॒ग्ं॒ सत॑नुं करोति।
सा॒त्मा॒ऽमुष्मि॑न्लो॒के भ॑वति।
य ए॒वं वेद॑।
अथो॒ वसो॑रे॒व धारा॒ं तेनाव॑रुन्धे।
इ॒लु॒वदा॑य॒ स्वाहा॑ बलि॒वदा॑य॒ स्वाहेत्या॑ह।
सं॒व॒थ्स॒रो वा इ॑लु॒वर्दः॑।
प॒रि॒व॒थ्स॒रो ब॑लि॒वर्दः॑।
सं॒व॒थ्स॒रादे॒व प॑रिवथ्स॒रादायु॒रव॑रुन्धे।
आयु॑रे॒वास्मि॑न्दधाति।
तस्मा॑दश्वमेधया॒जी ज॒रसा॑ वि॒स्रसा॒ऽमुं लो॒कमे॑ति॥ **81**॥

तेज॒सोऽव॑रुध्यै भव॒न्त्यश्वा॑ गोमृगमि॑लु॒वर्द॑श्व॒त्वारि॑ च॥ **20**॥

ए॒क॒वि॒ग्ं॒शो॑ऽग्निर्भ॑वति।
ए॒क॒वि॒ग्ं॒शः स्तोमः॑।
एक॑विग्ंशति॒र्यूपाः॑।
यथा॒ वा अश्वा॑ वर्॒ष॒भा वा॒ वृषा॑णः सग्ग्॒स्फु॒रेरन्न्॑।
ए॒वमे॒तथ्स्तोमा॒ः सग्ग्॒स्फु॑रन्ते।
यदे॑कवि॒ग्ं॒शाः।
ते यथ्स॑मृ॒च्छेरन्न्॑।
ह॒न्येता॑स्य य॒ज्ञः।

द्वा॒द॒श ए॒वाग्निः स्या॒दित्या॑हुः।
द्वा॒द॒शः स्तोम॑ः॥ **82**॥

एका॑दश॒ यूपाः॑।
यद्द्वा॑द॒शो॑ऽग्निर्भव॑ति।
द्वाद॑श॒ मासाः॑ संवथ्स॒रः।
सं॒व॒थ्स॒रेणै॒वास्मा॒ अन्न॒मव॑रुन्धे।
यद्दश॒ यूपा॒ भव॑न्ति।
दशा॑क्षरा वि॒राट्।
अन्नं॑ वि॒राट्।
वि॒रा॒जै॒वान्ना॒द्यमव॑रुन्धे।
य ए॑काद॒शः।
स्तन॑ ए॒वास्यै॒ सः॥ **83**॥

दु॒ह ए॒वैनां॒ तेन॑।
तदा॑हुः।
यद्द्वा॑द॒शो॑ऽग्निः स्या॑द्द्वाद॒शः स्तोम॒ एका॑दश॒ यूपाः॑।
यथा॒ स्थूरि॑णा या॒यात्।
ता॒दृक्तत्।
ए॒क॒वि॒ग्ं॒श ए॒वाग्निः स्या॒दित्या॑हुः।
ए॒क॒वि॒ग्ं॒शः स्तोम॑ः।
एक॑विग्ंशति॒र्यूपाः॑।



sunder kidāmbi prapatti dot com sunder kidāmbi

यथा॒ प्रष्टि॑भि॒र्याति॑।
ता॒दृगे॒व तत्॥ **84**॥

यो वा अ॑श्वमे॒धे ति॒स्रः क॒कुभो॒ वेद॑।
क॒कुद्ध॒ राज्ञा॓ भवति।
ए॒क॒वि॒ग्ं॒शो॓ऽग्निर्भ॑वति।
ए॒क॒वि॒ग्ं॒शः स्तोम॑ः।
एक॑विग्ंशति॒र्यूपा॓ः।
ए॒ता वा अ॑श्वमे॒धे ति॒स्रः क॒कुभ॑ः।
य ए॒वं वेद॑।
क॒कुद्ध॒ राज्ञा॓ भवति।
यो वा अ॑श्वमे॒धे त्रीणि॑ शी॒र्॒षाणि॒ वेद॑।
शिरो॑ ह॒ राज्ञा॓ भवति।
ए॒क॒वि॒ग्ं॒शो॓ऽग्निर्भ॑वति।
ए॒क॒वि॒ग्ं॒शः स्तोम॑ः।
एक॑विग्ंशति॒र्यूपा॓ः।
ए॒तानि॒ वा अ॑श्वमे॒धे त्रीणि॑ शी॒र्॒षाणि॑।
य ए॒वं वेद॑।
शिरो॑ ह॒ राज्ञा॓ भवति॥ **85**॥

द्वा॒द॒शः स्तोम॒ः स ए॒व तच्छिरो॑ ह॒ राज्ञा॓ भवति॒ षट्च॑॥ **21**॥

दे॒वा वा अ॑श्वमे॒धे पव॑माने।
सु॒व॒र्गं लो॒कं न प्राजा॑नन्न्।
तमश्वः॒ प्राजा॑नात्।
यद॑श्वमे॒धेऽश्वे॑न॒ मेध्ये॒नोद॑श्वो बहिष्पवमा॒नगं॒ सर्प॑न्ति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ प्रज्ञा॑त्यै।
न वै म॑नु॒ष्यः॑ सु॒व॒र्गं लो॒कमञ्ज॑सा वेद।
अश्वो॒ वै सु॑व॒र्गं लो॒कमञ्ज॑सा वेद।
यद॑ु॒द्गा॒तोद्गायेँ॑त्।
यथाऽक्षेँ॑त्रज्ञो॒ऽन्येनं॑ प॒था प्र॑तिपा॒दयेँ॑त्।
ता॒दृक्तत्॥ **86**॥

उ॒द्गा॒तार॑मप॒रुद्ध्य॑।
अश्वं॑मुद्गी॒थाय॑ वृणीते।
यथा॑ क्षेत्र॒ज्ञोऽञ्ज॑सा॒ नय॑ति।
ए॒वमे॒वैन॒मश्वः॑ सु॒व॒र्गं लो॒कमञ्ज॑सा नयति।
पुच्छ॑म॒न्वार॑भन्ते।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
हिं क॑रोति।
सामै॒वाकः॑।
हिं क॑रोति।
उ॒द्गी॒थ ए॒वास्य॒ सः॥ **87**॥

वडबा उपरुन्धन्ति।
मिथुनत्वाय प्रजात्यै।
अथो यथोपगातारं उपगायन्ति।
तादृगेव तत्।
उदगासीदश्वो मेध्य इत्याह।
प्राजापत्यो वा अश्वः।
प्रजापतिरुद्गीथः।
उद्गीथमेवावरुन्धे।
अथो ऋक्सामयोरेव प्रतितिष्ठति।
हिरण्येनोपाकरोति।
ज्योतिर्वै हिरण्यम्।
ज्योतिरेव मुखतो दधाति।
यजमाने च प्रजासु च।
अथो हिरण्यज्योतिरेव यजमानः सुवर्गं लोकमेति॥ **88**॥

तथ्स उपाकरोति चत्वारि च॥ **22**॥

पुरुषो वै यज्ञः।
यज्ञः प्रजापतिः।
यदश्वे पशून्नियुञ्जन्ति।
यज्ञादेव तद्यज्ञं प्रयुङ्क्ते।
अश्वं तूपरं गोमृगम्।

तानं॑ग्नि॒ष्ठ आलं॑भते।
से॒ना॒मु॒खमे॒व तथ्सग्ग्श्यं॑ति।
तस्मा॓द्राजमु॒खं भी॒ष्मं भावु॑कम्।
आ॒ग्ने॒यं कृ॒ष्णग्री॑वं पु॒रस्ता॓ल्ल॒लाटे॓।
पू॒र्वा॒ग्निमे॒व तं कु॑रुते॥ 89॥

तस्मा॓त्पूर्वा॒ग्निं पु॒रस्ता॓थ्स्थापयन्ति।
पौ॒ष्णम॒न्वञ्चं॓म्।
अन्नं॒ वै पू॒षा।
तस्मा॓त्पूर्वा॒ग्नावा॑हा॒र्य॑माहं॑रन्ति।
ऐ॒न्द्रा॒पौ॒ष्णमु॒परिं॑ष्टात्।
ऐ॒न्द्रो वै रा॑ज॒न्यो॑ऽन्नं॑ पू॒षा।
अ॒न्नाद्यें॑नै॒वैनं॑मु॒भ॒यत॒ः परिं॑गृह्णाति।
तस्मा॓द्राज॒न्यो॓ऽन्ना॒दो भावु॑कः।
आ॒ग्ने॒यौ कृ॒ष्णग्री॑वौ बा॒हु॒वोः।
बा॒हु॒वोरे॒व वी॒र्यं॑ धत्ते॥ 90॥

तस्मा॓द्राज॒न्यो॑ बाहु॒ब॒ली भावु॑कः।
त्वा॒ष्ट्रौ लो॑मशस॒क्थौ स॒क्थ्योः।
स॒क्थ्योरे॒व वी॒र्यं॑ धत्ते।
तस्मा॓द्राज॒न्यं॑ ऊरुब॒ली भावु॑कः।
शि॒ति॒पृ॒ष्ठौ बा॑र्ह॒स्प॒त्यौ पृ॒ष्ठे।

ब्रह्मवर्चसमेवोपरिष्टाद्धत्ते।
अथो कवचे एवैते अभितः पर्यूहते।
तस्माद्राजन्यः सन्नद्धो वीर्यं करोति।
धात्रे पृषोदरमधस्तात्।
प्रतिष्ठामेवैतां कुरुते।
अथो इयं वै धाता।
अस्यामेव प्रतितिष्ठति।
सौर्यं बलक्षं पुच्छे।
उथ्सेधमेव तं कुरुते।
तस्मादुथ्सेधं भये प्रजा अभिसङ्ग्श्रयन्ति॥ **91**॥

कुरुते धत्ते कुरुते पञ्च च॥ **23**॥

साङ्ग्रहण्या चतुष्टय्यो यो वै यः पितुश्चत्वारो यथा
निक्तं प्रजापतये त्वा यथा प्रोक्षितं विभूराह
प्रजापतिरकामयताऽश्वमेधेनं प्रजापतिर्न किञ्च न
सावित्रमाब्रह्मन्प्रजापतिर्देवेभ्यः प्रजापती रक्षाग्ंसि
प्रजापतिमीप्सति विभूरश्वनामान्यम्भाग्ंस्येकयूपो
राज्ञुदालमेकविग्ंशो देवाः पुरुषस्त्रयोविग्ंशतिः॥ **23**॥

साङ्ग्रहण्या तस्मादश्वमेधयाजी यत्परिमिता
यद्यज्ञमुखे यो दीक्षां देवानेव त्रयं इमे सितायं
प्राणाऽपानावेवास्मिन्तस्माद्राजन्यं एकनवतिः॥ **91**॥

साङ्ग्रहण्या सङ्ग्श्रयन्ति॥

॥ इति कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टके अष्टमः प्रश्नः समाप्तः॥



sunder kidambi
prapatti dot com
sunder kidambi